# संस्कृतवार्ता:

दिनाङ्क :   15.09.25                                        सायम्  - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा प्रधानमन्त्रिणा नरेन्द्रमोदिना चत्वारिंशत्सहस्र-कोटिरूप्यकाणां विकासपरियोजनाः उद्घाटिताः, येषु पूर्णिया-नगरस्य विमानस्थानकं, बिहारस्य राष्ट्रिय-मखाना-बोर्ड् च अन्तर्भवन्ति।
- सर्वोच्चन्यायालयेन वक्फ्-विधिं स्थगयितुं निराकृतम्, परन्तु पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य वक्फ्-संशोधन-अधिनियमस्य कतिपयेषु प्रावधानेषु स्थगनं कृतम्।
- वित्तमन्त्री निर्मला सीतारामन इत्येषा अकथयत् यत् यदि आर्टिफिसियल इन्टेलिजेन्स-ए. आई. द्रुतगत्या अग्रे गच्छति तर्हि नियमाः अपि समानरूपेण चलिष्यन्ति ।
- यूनिफाइड पेमेण्ट्स इन्टरफेस (यू पी आई) उपयोक्तारः अधुना चतुर्विंशति-होराभ्यन्तरे दशलक्षरूप्यकाणां ग्राहकाः व्यापारिभ्यः आदान-प्रदानं कर्तुं शक्नुवन्ति।

===========================

<u>प्रधानमन्त्री -बिहार:</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहारस्य पूर्णिया-जनपदात् चत्वारिन्शत् सहस्र-कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, शिलान्यासं च कृतवान्। जनपदस्य गुलाबबागस्य शीशाबाडी इत्यत्र जनसमूहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् बिहारस्य जनानां जीवनं सुकरं कर्तुं डबलइंजन -सर्वकारः निरन्तरं कार्यं कुर्वन्स्तितती।

इतः पूर्वं अद्य नवनिर्मितस्य पूर्णिया-विमानस्थानकस्य उद्घाटने श्रीमोदी अवदत् यत्, पूर्णिया इदानीं देशस्य विमानयान-मानचित्रे आगतम् इति। एतेन विमानस्थानकेन, पूर्णिया-नगरात् देशस्य अन्येषु भागेषु अन्ताराज्यीय विमानसेवाः आरभ्यन्ते। प्रधानमन्त्री मोदी बिहारराज्ये राष्ट्रिय-मखाना-बोर्ड् इत्यस्य अपि उद्घाटनम् अकरोत्। परिषद् उत्पादनस्य नूतन-तन्त्रज्ञानस्य च विकासं प्रवर्धयिष्यति, सस्योत्पादनानन्तरं प्रबन्धनं सुदृढं करिष्यति, मूल्यवर्धनं प्रक्रियां च

प्रोत्साहयिष्यति, विपणनं, निर्यातं, ब्राण्ड्-विकासं च सुकरं करिष्यति, येन बिहारस्य, सम्पूर्णे देशे च मखाना-कृषकाः लाभान्विताः भविष्यन्ति। विद्युत्क्षेत्रे प्रधानमन्त्रिणा भागलपुरस्य पीरपैंती इत्यत्र चतुर्विंशतिशतं यावत् मेगावाट् तापविद्युत्-परियोजनायाः शिलान्यासः कृतः। सः कोसी-मेची-राज्यान्तर्गतं नदी-सम्पर्क-परियोजनायाः प्रथमस्य चरणस्य शिलान्यासम् अपि कृतवान्। रेल-क्षेत्रे प्रधानमन्त्रिणा अनेकासां परियोजनानाम् उद्घाटनम्, शिलान्यासं, नूतनानां रेल्-यानानां ध्वजप्रदर्शनं च कृतम्।

=============================

## शाह-नक्सल-अभियानम्

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य अवदत् यत् सी. आर्. पी. एफ्. इत्यस्य कोबरा-बटालियन् तथा झारखण्ड्-आरक्षकाणां संयुक्तदलं हजारीबाग्-नगरे नक्सल्-विरोधी-कार्याचरणे महतीं सफलतां प्राप्नोत्। एकस्मिन् सोशलमीडिया-सन्देशे श्रीशाहः अवदत् यत्, कुख्यातः नक्सल्-सेनापतिः सहदेव सोरेनः अस्मिन् अभियाने मारितः।

=============================

## सर्वोच्चन्यायालय-वक्फ् आदेशः

सर्वोच्चन्यायालयेन वक्फ्-विधिं स्थगयितुं निराकृतम्, परन्तु पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य वक्फ्-संशोधन-अधिनियमस्य कतिपयेषु प्रावधानेषु स्थगनं कृतम्। वक्फ्-रूपेण सम्पत्तिं समर्पणात् पूर्वम् कश्चन जनः पञ्चवर्षपर्यन्तं मुस्लिम-मतानुयायि भवितुमर्हति इत्येषः खण्डः स्थगितः अस्ति। सर्वोच्चन्यायालयेन निर्णयः प्रदत्तः यत् यावत् राज्यसर्वकाराः एतादृशानां नियमानां निर्धारणार्थं उचित- नियमानां निर्माणं न करिष्यन्ति तावत् अयं खण्डः स्थगितः भविष्यति इति। भारतस्य मुख्यन्यायाधीशः बी. आर्. गवई, न्यायमूर्ति आगस्टीन् जार्ज् मासिह् इत्येतयोः पीठः अन्तरीमाज्ञां घोषयन् अवदत् यत्, सः प्रत्येकस्य खण्डस्य प्रथमदृष्ट्या समाह्वान-विषये विचारं कृतवान्, तथा च सम्पूर्णं विधानं स्थगयितुं किमपि प्रकरणं न निर्मितम् इति। न्यायालयेन अवलोकितं यत् कार्यपालक-अधिकारिणः नागरिकानाम् अधिकारान् निर्णेतुं न शक्नुवन्ति, एतेन अधिकाराणां पृथक्करणस्य उल्लङ्घनं भविष्यति। न्यायालयेन एतादृशेषु

विवादित-सम्पत्तिषु तृतीयपक्षस्य अधिकारस्य निर्माणे अपि प्रतिबन्धः कृतः यावत् न्यायाधिकरणे विषये निर्णयः न भवति। न्यायालयेन वक्फ्-संस्थासु मुस्लिमेतराणां समावेशनस्य उपबन्धम् अपि विचारितम् अस्ति। वक्फ्-बोर्ड्-मध्ये मुस्लिमेतर-सदस्यानां नामाङ्कनस्य अनुमतिः प्रदत्ता व्यवस्था न स्थगिता अस्ति।

=============================

महाराष्ट्र-किरेन रिजिजू

अल्प-सङ्ख्यक-कार्यमन्त्री किरेन रिजिजूः वक्फ-संशोधन-विधेयकस्य विषये सर्वोच्चन्यायालयस्य निर्णयस्य स्वागतम् अकरोत्, इदं भारतस्य संसदीय-लोकतन्त्रस्य दृढस्तम्भः इति अवोचत्। मुम्बई-नगरे वार्ताहरैः सह वार्तालापं कुर्वन्, श्री रिजिजुः अवदत् यत् इतिहासस्य दीर्घतमस्य चर्चायाः अनन्तरं संसदा एतत् विधेयकं स्वीकृतम् इति, तथा च एतत् सम्पूर्णं मुस्लिम-समुदायान्, निर्धनान्-मुस्लिम-भ्रातॄन्, महिलानां च कृते लाभप्रदं भविष्यति इति दृढीकृतवान्।

ततः पूर्वं, श्री रिजिजू इत्यमुना मुम्बई-विश्वविद्यालयस्य कलिना-परिसरस्य रिक्थ-भाषायाः तथा सांस्कृतिक-अध्ययनस्य उत्कृष्टता-केन्द्रस्य शिलान्यास-समारोहस्य अध्यक्षता कृता।

=============================

सीतारामणः-ए-आई

वित्तमन्त्री निर्मला सीतारामन इत्येषा अकथयत् यत् यदि आर्टिफिसियल इन्टेलिजेन्स-ए. आई. द्रुतगत्या अग्रे गच्छति तर्हि नियमाः अपि समानरूपेण चलिष्यन्ति । सा अद्य नवदिल्ल्यां विकसित-भारतस्य तथा फ्रंटियर-टेक्-रिपोजिटरी इत्येतयोः कृते ए. आई. इत्यस्य मार्गदर्शिकायाः विषये नीति-आयोगस्य प्रतिवेदनस्य विमोचनावसरे एतत् उक्तवती। श्रीमती सीतारामन इत्येषा ए. आई. इत्यस्य द्रुतवृद्धेः विषये सावधानम् अकरोत्, यत् जनाः जागरूकाः भवेयुः, नैतिकतां न त्यजेयुः इति।

इलेक्ट्रानिक्स सूचना प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः अपि च नीति आयोगस्य सि. ई. ओ. बी. वी. आर्. सुब्रह्मण्यम् अपि अस्मिन् कार्यक्रमे भागम् अगृह्णन्। श्री वैष्णवः भविष्ये

विद्यमानासु प्रौद्योगिकीषु निपुणतां प्राप्य प्रतिभा- श्रृंखलायाः विकासस्य आवश्यकतायाः विषये अवधानं दत्तवान्।

==============================

<u>यूनिफाइड पेमेण्ट्स इन्टरफेस</u>

यूनिफाइड पेमेण्ट्स इन्टरफेस (यू पी आई) उपयोक्तारः अधुना चतुर्विंशति-होराभ्यन्तरे दशलक्षरूप्यकाणां ग्राहकाः व्यापारिभ्यः आदान-प्रदानं कर्तुं शक्नुवन्ति, अद्यारभ्य चयनितवर्गेभ्यः व्यापारिभिः सह सत्यापितं क्रियते । चयनितवर्गेषु पी-टू-एम-व्यवहाराणां कृते एक-व्यवहार-सीमा अपि पञ्चलक्षरूप्यकाणि यावत् वर्धिता अस्ति। नेशनल पेमेण्ट्स कार्पोरेशन ऑफ इण्डिया (एन. पि. सि. आई.) इत्यनेन गतमासे प्रसारिते परिपत्रके सूचितं यत् प्रति-व्यवहारस्य सीमा पञ्च लक्षरूप्यकाणि यावत् वर्धितास्ति।

==============================

<u>ऋतु विभागः</u>

भारत-ऋतु-विभागेन कोङ्कण, गोवा, बिहार, उत्तरप्रदेशं च समेत्य पूर्वोत्तरभारते अतिवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। अद्य मध्यमहाराष्ट्रे, मराठवाडायां, उपहिमालयीय पश्चिमबङ्गे, उत्तराखण्डे च एतादृश्यः एव परिस्थितयः प्रचलन्ति। अद्य मुम्बईनगरस्य दादर, अन्धेरी, कुर्ला, बान्द्रा इत्यादिषु अनेकेषु भागेषु प्रचण्डवृष्ट्या जलमग्नानन्तरं यातायातः बाधितः अभवत् ।

==============================

<u>बाम्बे-उच्चन्यायालयः</u>

बाम्बे-उच्चन्यायालयस्य मुख्यन्यायाधीशः चन्द्रशेखरः अद्य मुम्बई-नगरस्य राजभवने महाराष्ट्रस्य राज्यपालत्वेन आचार्यदेवव्रतं शपथ ग्रहणं कारितवान्। आचार्यदेवव्रतः संस्कृतभाषायां शपथं स्वीकृतवान्। सः राज्यस्य द्वाविंशतितमः राज्यपालः अस्ति। सः भारतस्य उपराष्ट्रपतिरूपेण निर्वाचितस्य सी पी राधाकृष्णन वर्यस्य स्थाने राज्यपालः अभवत्।

।इति वार्ताः ।।